॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ४१

ततः स किङ्करान्हत्वा हनूमान्ध्यानमास्थितः ।
वनं भग्नं मया चैत्यप्रासादो न विनाशितः ।
तस्मात्प्रासादमप्येवमिमं विध्वंसयाम्यहम् ॥ १॥

इति सञ्चिन्त्य हनुमान्मनसा दर्शयन्बलम् ।
चैत्यप्रासादमासृत्य मेरुशृङ्गमिवोन्नतम् ।
आरुरोह हरिश्रेष्ठो हनूमान्मारुतात्मजः ॥ २॥

सम्प्रधृष्य च दुर्धर्षश्चैत्यप्रासादमुन्नतम् ।
हनूमान्प्रज्वलँल्लक्ष्म्या पारियात्रोपमोऽभवत् ॥ ३॥

स भूत्वा तु महाकायो हनूमान्मारुतात्मजः ।
धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ४॥

तस्यास्फोटितशब्देन महता श्रोत्रघातिना ।
पेतुर्विहङ्गा गगनादुच्चैश्चेदमघोषयत् ॥ ५॥

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ६॥

दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ।
हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ७॥

न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ।
शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ ८॥

अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् ।
समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥ ९॥

एवमुक्त्वा विमानस्थश्चैत्यस्थान्हरिपुङ्गवः ।
ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयम् ॥ १०॥

तेन शब्देन महता चैत्यपालाः शतं ययुः ।
गृहीत्वा विविधानस्त्रान्प्रासान्खड्गान्परश्वधान् ।
विसृजन्तो महाक्षया मारुतिं पर्यवारयन् ॥ ११॥

आवर्त इव गङ्गायास्तोयस्य विपुलो महान् ।
परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः ॥ १२॥

ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः ॥ १३॥

प्रासादस्य महांस्तस्य स्तम्भं हेमपरिष्कृतम् ।
उत्पाटयित्वा वेगेन हनूमान्मारुतात्मजः ।
ततस्तं भ्रामयामास शतधारं महाबलः ॥ १४॥

स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान् ।
अन्तरिक्षस्थितः श्रीमानिदं वचनमब्रवीत् ॥ १५॥

मादृशानां सहस्राणि विसृष्टानि महात्मनाम् ।
बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् ॥ १६॥

शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ।
आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ॥ १७॥

नेयमस्ति पुरी लङ्का न यूयं न च रावणः ।
यस्मादिक्ष्वाकुनाथेन बद्धं वैरं महात्मना ॥ १८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com